**दिनाङ्क :01.06.2025**

**प्रात: - 06:55**

**प्रधानमन्त्री मध्य प्रदेश**

प्रधानमंत्री नरेन्द्र मोदी ह्य: भोपालस्य जम्बूरी प्रांगणे लोकमाता देवी अहिल्याबाई इत्यस्याः त्रिंशततम्याः जयन्त्याः अवसरे आयोजितं महिला सशक्तीकरण सम्मेलनं सम्बोधितवान् । अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् पहलगाम आतंकी आक्रमणम् भारतस्य नारी शक्तीनां कृते समाह्वानं आसीत् सममेव आक्रमणस्य व्यूह रचयितृणां कृते मृत्योः संदेशं एव वर्तते । असौ प्रोक्तवान् यत् भारतं कश्चिदपि परोक्ष युद्धं अक्षम्यरूपेण द्रक्ष्यति ।

प्रशासनस्य जनकल्याण योजनाया: विषये सः अवदत् यत् अस्माकं प्रशासनम् लोकमाता अहिल्याबाई देव्याःनागरिक देवो भवः इति मंत्रमालक्ष्य कार्यं करोति । अस्माकं प्रशासनम् महिला नेतृत्वे विकासस्य दृष्टिकोणं मुख्याधारात्वेन निर्माति । प्रशासनस्य प्रत्येकं उत्तमासु योजनासु महिलानां महत्वपूर्णा भूमिका अस्ति ।

**शिवराज चौहान**

केन्द्रीय कृषि एवं कृषक कल्याण मन्त्री शिवराज सिंह चौहान: अवोचत् यत् विकसितं कृषि संकल्प अभियानं केवलं सर्वकारीय-योजनात्वेन न अपितु जन-आन्दोलनत्वेन वर्तते। योजना इयं कृषकेभ्य: बहुमूल्या: सूचना: यच्छति।

विभिन्नानां राज्यानां विधायकै: समं आभासीय माध्यमेन वार्तां कुर्वन् श्री चौहान: अवोचत् यत् अस्याभियानस्य अन्तर्गतं कृषकै: साकं प्रमुख-विषयेषु चर्चां भविष्यति अपि च तेषां सर्वेषां प्रश्नानां समाधानं संबंधित विषय-विशेषज्ञा: विधास्यन्ति।

श्री चौहानेन प्रोक्तं यत् अस्य लाभ: कृषि कार्ये निष्चप्रचं भविष्यति।

**एन.आई.ए.**

एन-आई-ए इति राष्ट्रीय-अन्वेषण-अभिकरण इत्यनेन पाकिस्तान-सम्बद्ध प्रकरणे अष्टराज्यस्य पञ्चदशस्थानेषु अन्वेषणं विहितम्। एकस्मिन् वक्तव्ये एन-आई-ए इत्यनेन उक्तं यत् दिल्ली-मुम्बै, हरियाणा, उत्तरप्रदेश, राजस्थान, छत्तीसगढ़, असम, पश्चिमबङ्ग राज्ये च अन्वेषणं अभवत् यतो हि पाकिस्तानस्य गुप्तचरकार्यकर्तार: पी.आई.ओ. इत्यत: सम्बद्ध-कार्यालयेषु कार्यं कुर्वन्ति।

**अथ्लेटिक्स्-च्याम्पियन्शिप्-क्रीडायां**

दक्षिणकोरिया-देशस्य गुमी-नगरे पंचविशत्युत्तर द्विसहस्र तमे वर्षे आयोजितायां एशियन्-अथ्लेटिक्स्-च्याम्पियन्शिप्-क्रीडायां भारतं चतुर्विंशतिः पदकानि विजित्य पदकतालिकायां द्वितीयं स्थानम् भजते। प्रतियोगितासु भारतं अष्ट सुवर्णपदकानि, दश रजतपदकानि, षट् कांस्यपदकानि च अवाप्नोत्। एतदतिरिच्य अनिमेश् कुजूर्, पारुल् चौधरी च अस्मिन् कार्यक्रमे नूतनं राष्ट्रिय-कीर्तिमानं स्थापितवन्तौ। ह्य:च्याम्पियन्शिप्-स्पर्धायाः अन्तिमदिने भारतं त्रीणि रजतपदकानि, त्रीणि कांस्यपदकानि च प्राप्नोत्।

**आई.पी.एल.**

आई.पी.एल. क्रिकेट स्पर्धायाम् अद्य अहमदाबादस्य नरेन्द्र मोदी क्रीडांगणे मुम्बै इन्डियन्स दलं पंजाब किंग्स दलं सम्मुखी-करिष्यति। अवधेयं यत् क्रीडा इयं सायं सार्ध सप्त वादने भविष्यति। अपि च विजयत्वेन यत् दलं भविष्यति तस्य दलस्य प्रतिस्पर्धा रॉयल चैलेंजर्स बैंगलुरू दलस्य साकं नरेन्द्र मोदी क्रीडांगणे मंगलवासरे भविष्यति।

**संस्कृत-साप्ताहिकी**

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत:भविष्यति। कृपया श्रृण्वन्तु।